# फलितज्योतिषशास्त्रस्य सङ्क्षिप्तविकासक्रमः

अम्बरराजढकालः
उपप्राध्यापकः-फलितज्योतिषम्
नेपालसंस्कृतविश्वविद्यालयः - पिण्डेश्वर विद्यापीठम्, धरानः
dhakalguru12@gmail.com

## शोधसारः

शोधकार्योऽयं ज्योतिर्वाङ्मये फलितज्योतिषशास्त्रस्य विषयानुगतः कालक्रमिकश्च विकासक्रमस्य गवेषणे विरचितः । त्रिस्कन्धात्मकं ज्योतिषशास्त्रं सिद्धान्तसंहिताहोरेति शाखात्रयेण विभाजितं विद्यते । तासु शाखासु प्रथमः सिद्धान्तस्कन्धो ग्रहनक्षत्रादि–आकाशीयपिण्डानां गतिस्थित्यादि खगोलीयमानप्रभेदमापको वर्तते । अस्य चर्चात्र स्वल्पमात्रमस्ति । अपरौ संहिताहोरास्कन्धौ ग्रहनक्षत्राद्याकाशीयपिण्डानां गतिस्थित्याधारे पृथ्व्यां मानवजीवने च शुभाशुभफलप्रभावस्य प्रकाशकशास्त्रे विद्येते । अतः संस्कृतभाषायां निबद्धे ज्योतिर्वाङ्मये संहिताशास्त्रं होराशस्त्रं च सम्प्रति फलितज्योतिषनाम्ना सम्बोधितमस्ति । फलितज्योतिषे संहिताशास्त्रात् मुख्यतः मुहूर्तशास्त्रम्, वास्तुशास्त्रम्, शकुनशास्त्रम्, स्वरशास्त्रम्, स्वप्नशास्त्रम्, प्रतिमालक्षणशास्त्रम्, रत्नपरीक्षणशास्त्रं विकसितं विद्यते । तदतिरिक्तानि अन्यानपि बहुविधविषयानि संहिताशास्त्रात् विकसितानि दृश्यन्ते । एवमेव होराशास्त्रात् जातकः, प्रश्नः, ताजिकः, सामुद्रिक (अङ्गलक्षण) शास्त्रम्, चेति वैयक्तिकफलादेशोपकारकाणि उपविभागानि विकसितानि विद्यन्ते । इत्थं संहिताहोराशास्त्रयोः संयोजनेन फलितज्योतिषशास्त्रं विकसितं वर्तते । वराहमिहिराचार्यकृतेन विश्लेषणेन ज्योतिषशास्त्रं त्रिस्कन्धेषु विभाजितम् । ततः संहिताहोराशास्त्रयोर्नवीनस्वरूपं विकसितं विद्यते । तदेव सम्प्रति फलितज्योतिषशास्त्रस्य शास्त्रीयसिद्धान्तः मन्यते । मिहिरविश्लेषणेन विरचितानि ग्रन्थरत्नानि केन्द्रविन्दुमत्वा तत्पूर्ववर्तिकालः फलितज्योतिषशास्त्रस्य प्राचीनार्षकालः तदुत्तरवर्तिकालश्च फलितज्योतिषशास्त्रस्यार्वाचीनकालो विकसितो विद्यते । संहिताशास्त्रस्य प्रचीनार्षकालं वैदिकसंहिताकालः, आर्षसंहिताकालो वेदाङ्ज्योतिषकालः, वाराहिसंहितापूर्वकाल इति चतुर्धा विभज्य तेषां वैशिष्ट्यमत्र प्रस्तुतमस्ति । तथैव संहिताशास्त्रस्य अर्वाचीनकालं ग्रन्थप्रणयनकालः, व्याख्याविवृत्तिटीकालेखनकालः, ग्रन्थसंग्रहकालश्चेति त्रिधा विभज्य तत्र

रचितग्रन्थानां वैशिष्ट्यं प्रस्तुतं वर्तते । एवमेव होराशास्त्रस्य प्राचीनकालं वैदिकसंहिताकालः, प्राचीनार्षकालः, वेदाङ्गज्योतिषकालः, प्राचीनार्षोत्तरवर्ति वराहमिहिरपूर्ववर्तिकालश्चेति चतुर्धा विभज्य तेषां वैशिष्ट्यमत्र प्रस्तुतमस्ति । एवमेव होराशास्त्रस्याधुनिककालं जातकः, प्रश्नः, ताजिकः, सामुद्रिकम्, रमलम्, स्वप्नश्चेति विषयगतविकासस्य वैशिष्ट्यमत्र प्रस्तुतमस्ति । प्रकृते शोधसन्दर्भे फलितज्योतिषशास्त्रस्य ऐतिह्यं पर्यावलोक्य एतत्छास्त्रस्य प्रवर्तनोद्भवः शास्त्रीयाधरः कालक्रमो विषयक्रमश्च सङ्केतपूर्वकं ग्रन्थानुगतिको विकासक्रममत्र प्रस्तावितं विद्यते। पुनश्च नेपाले विरचितानां ज्योतिषग्रन्थानां ऐतिह्यमप्यत्र प्रदर्शितं विद्यते ।

**शब्दकुञ्जी** – जातकशास्त्रम्, ताजिकशास्त्रम्, फलितज्योतिषस्यैतिह्यम्, संहिताशास्त्रम्, होराशास्त्रम् ।

## शोधोपक्रमः

नेपाल-भारतादिषु तयोः समीपस्थेषु देशेषु फलितज्योतिषशास्त्रस्य अभ्यासः, व्यावहारिकप्रयोगः, तस्य परम्परा च प्राचीनकालादधुना यावत् प्रचलिता विद्यते । शास्त्रस्यास्य फलादेशपरकाः शास्त्रीयसिद्धान्ताः प्राचीनग्रन्थेषु विकीर्णा विद्यन्ते । ज्योतिर्वाङ्मयस्य संहिताशास्त्रे होराशास्त्रे च शुभाशुभफलप्रकाशकाः विषयवैविध्ययुता ग्रन्थरत्ना विद्यन्ते । भारतीय-ज्योतिषशास्त्रस्येतिहासकाराः स्वरचिते ज्योतिषशास्त्रस्येतिहासे संहिताहोराशास्त्रयोर्विशदं वर्णनं कुर्वन्ति । भारतस्थेषु संस्कृतविश्वविद्यालयेषु नेपालस्थे संस्कृतविश्वविद्यालये च ज्योतिषविभागे ज्योतिषविषयकपाठ्यक्रमेष्वपि संहिताहोराशास्त्रं फलितज्योतिषनाम्ना स्वीकृतं विद्यते । परन्तु तत्राध्याप्यमानाः प्राध्यापकाः, अधीयमानाः छात्रवर्गाश्च फलज्योतिषस्य स्वशास्त्रीयं ऐतिह्यमध्ययने काठिन्यमनुभवन्ति । दृष्टिविहीनस्य कृते हस्तिस्पर्शनमिव पूर्वजैर्यल्लिखितं तदेव तैः स्वीकुर्वन्ति। तत्र विद्यमानस्य फलितज्योतिषशास्त्रस्य नवक्षितिजस्तैर्न दृष्टः। तेषां मनसि नूतनचिन्तनं, नयनयोर्नवदृष्टिश्च प्रत्यागमने शोधनिबन्धोऽयं शोधितः । लौकिकव्यवहारेऽपि संहिताहोराया नामः फलितज्योतिषमिति प्रसिद्धैव । अत्याधुनिकैरनेकैः स्वघोषितैः फलवेदीज्योतिर्विद्भिर्यत्फलादेशं क्रियते, तस्य सैद्धान्तिकशास्त्रीयाधारमेव संहिताशास्त्रं होराशास्त्रञ्चास्ति । परन्तु तैरपि शास्त्रीयज्ञानविनैवापणे ज्योतिषशास्त्रस्य नाम विक्रयन्ति । अतस्तेषामुपकारार्थं विशेषत आचार्यकक्षायां अधीयमानछात्राणामुपकाराय फलितज्योतिषशास्त्रस्य संक्षिप्तेतिवृत्तमिदं विरचितम् ।

## शोधसमस्याकथनम्

सम्प्रति सम्बोधितः प्रचारितो वा फलितज्योतिषशास्त्रस्य शास्त्रीयाधारः क ? अस्य शास्त्रस्य विकासः कथमभवत् ? इति शोधजिज्ञासा ह्यस्य शोधकार्यस्य मूलसमस्या वर्तते । फलितज्योतिषे फलादेशपरकाः

शाखा, शाखासम्बद्धानि शास्त्राणि च कानि ?, तेषां ग्रन्थाः केन कदा विरचिताः ?, कुत्र च प्रचलिताः ?, फलादेशे कस्य ग्रन्थस्य किमवदानम् ?, सिद्धान्तकाराणां ग्रन्थकाराणां वा स्थितिकालश्च किम् ? नेपाले ज्योतिषशास्त्रस्य ऐतिह्यं किदृशमस्तीति प्राज्ञिकाः शोधप्रश्ना एव शोधकार्यस्यास्य समस्यारूपेण स्थापिता विद्यन्ते ।

## शोधोद्देश्यम्

फलितज्योतिषशास्त्रस्य शास्त्रीयाधारं स्वशास्त्रीयं ऐतिह्यं च निरूप्य तस्य क्रमिकविकासस्य स्थितिः प्रदर्शनं हि प्रकृतस्य शोधकार्यस्य मूलमुद्देश्यं वर्तते । सम्प्रत्युपलब्धफलितग्रन्थानुसारेण फलितज्योतिषशास्त्रस्य फलादेशपरकाः शाखाः, प्रशाखाः तत्सम्बद्धाः ग्रन्थाः, ग्रन्थप्रणयनकालः, तेषां ग्रन्थकाराः, ग्रन्थकर्तुः स्थितिकालः, फलकथने तस्य ग्रन्थस्यावदानञ्चोल्लेखनेन शास्त्रस्यास्य संक्षिप्तविकासक्रमान्वेषणमस्य शोकार्यस्य विशेषोद्देश्यमस्ति ।

## शोधविधिः सीमाङ्कनञ्च

शोधलेखेऽस्मिन् पुस्तकालयप्रयोगेण शोध्यसामग्रीसङ्कलनं विधीयते । संग्रहितानां सामग्रीणां व्यवस्थापने विश्लेषणात्मक–वर्णनात्मक–ऐतिहासिकानां विधीनां समुपयोगो विद्यते । ज्योतिषशास्त्रस्य संहिताहोराभिः सह समुद्भवानां पुष्पितानां पल्लवितानां च शाखोपशाखास्वत्र केवलं संहिता–होरा–जातक–प्रश्न–ताजिक–मुहूर्त–वास्तु–सामुद्रिक–रमल–स्वप्नश्चेति विभागानां सिंहावलोकनेन तेषां संक्षिप्तविकासक्रमं प्रस्तुतमस्ति। तथा च नेपालदेशे ज्योतिषग्रन्थरचनायाः परम्पराऽप्यत्र दिङ्निर्देशनमत्रं विहितमस्ति ।

## पूर्वाध्ययनपर्यावलोकनम्

भारतीयज्योतिषशास्त्रस्येतिहासकाराणां तत्प्रणीतग्रन्थानाञ्च सूची सुदीर्घाः सुविपुलाश्च वर्तते। तेषु मध्येषु नेमीचन्द्रशास्त्रीमहोदयस्य हिन्दीभाषायां निबद्धः “भारतीय ज्योतिष”, आचार्यलोकमणिदाहालकृतः “भारतीय–ज्योतिषशास्त्रस्येतिहासः”, खिलानाथबास्ताकोटीमहाभागस्य नेपालीभाषायां रचितः “फलित ज्योतिष शास्त्र” इत्याख्या निबन्धग्रन्था अस्य शोधकार्यस्य पूर्वाध्ययनस्य मुख्याधारभित्तय वर्तन्ते ।

नेमीचन्द्रशास्त्रीमहाभागाः, भारतीय ज्योतिष (ई.सं. १९५२, वि.सं.२००९) इत्याख्ये हिन्दीभाषायां विरचिते ज्योतिषशास्त्रस्येतिहासग्रन्थे भारतीयज्योतिषशास्त्रस्य कालवर्गीकरणं करोति। तत्रासौ अन्धकारकालः (ई.पू.१००० वर्षपूर्वम्), उदयकालः (ई.पू. १००१–ई.पू.५०० वर्षपूर्वपर्यन्तम्), पूर्वमध्यकालः (ई.५०१–१००० वर्षपर्यन्तम्), उत्तरमध्यकालः (ई.१००१–१६०० वर्षपर्यन्तम्), आधुनिककालो वा अर्वाचीनकालः (ई. १६०१–ई. १९५१) इति पञ्चधा विभज्य प्रस्तौति । ग्रन्थेऽस्मिन् जातकशास्त्रस्य चर्चा अधिकतरमस्ति ।

एतदस्य सामर्थ्यम्। फलितज्योतिषशास्त्रस्यान्यविभागानामितिवृत्तं तु स्वल्पमात्रमपि नास्ति । एतत्त्वस्य सीमा वर्तते । अमुष्य कालवर्गीकरणं समग्रस्य भारतीयज्योतिषस्य सन्दर्भे समुचितमेव परन्तु फलितज्योतिषस्य विकासस्य कालवर्गीकरणे विषयविभाजने च एतन्मतं समुचितं नास्ति ।

आचार्यलोकमणिदहालः, भारतीय ज्योतिषशास्त्रस्येतिहासः (वि.सं. २०४७) इत्याख्ये ग्रन्थे ज्योतिषशास्त्रस्य विकासक्रमस्य कालविभाजनं पञ्चष्ववस्थासु विभक्तो दृश्यते । यथा प्राग्वैदिककालः, वैदिकसंहिताकालः, वेदाङ्गकालः, सिद्धान्तकालः, आधुनिककालश्चेति । असौ पुनः वैकल्पिकः कालविभाजनं करोति । यथा अज्ञातकालः, आदिकालः, पूर्वमध्यकालः, उत्तरमध्यकालः, आधुनिककालश्चेति । आचार्येण प्रस्तूतग्रन्थरचनाक्रमे अन्येषां भारतीयज्योतिषशास्त्रस्येतिहासकाराणां आधारभित्तयः समालोच्य स्कीयग्रन्थे कालविभाजनं विषयविभाजनमपि कृतम् । तेषु विषेशतः श्रीसुधाकरस्य गणकतरङ्गिणी, श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषम्, गोरक्षप्रसादस्य भारतीयज्योतियस्येतिहासः, नेमीचन्द्रशास्त्रिणः भारतीय ज्योतिषम्, काणेमहोदयस्य धर्मशास्त्रस्येतिहासः, बलदेवमिश्रस्य ज्योतिषशास्त्रस्य सिंहावलोकनमित्यादितः सामग्री समाकलनेनाचार्येण ज्योतिषशास्त्रस्य कालविभाजनं शाखाप्रशाखानामपि विभाजनं कृतम् । अनेन कृतेनाध्ययनेन ज्योतिषशास्त्रस्य विकासक्रमस्य विद्यमानस्थितिः प्रदर्शयति परन्तु फलितज्योतिषशास्त्रस्य विकासस्य पृथक् स्थितिस्त्वत्र नोद्घाटितं विद्यते । अनेनाचार्येण यथा यथा हि पूर्वाचार्यैरुक्तं तथातथात्र ग्रन्थकाराणां स्थितिकालः ग्रन्थप्रणयनकालश्च स्थापितोऽस्ति । सिद्धान्तसंहिताहोरायाः पृथक् पृथक् चर्चा विहिता परन्तु तेषां विभागानां पृथक् पृथक् कालविभाजनं तु न कृतम् । अतः फलितज्योतिषशास्त्रस्य विकासस्य कालवर्गीकरणं विषयविभाजनकार्यञ्चावशिष्टं दृश्यते । खिलानाथवासताकोटीमहोदयः, फलित ज्योतिष शास्त्र (वि.सं.२०६१) इति शीर्षकान्विते नेपालीभाषायां लिखितेऽस्मिनालेखे नेमिचन्द्रशास्त्रीद्वारा विभाजितस्य कालवर्गीकरणस्याधारेणैव ज्योतिषशास्त्रस्य विकासक्रमं वर्गीकरोति । अनेन खिलनाथेन कृतस्याध्ययनेन फलितज्योतिषशास्त्रस्य सर्वेषां विभागानां शाखाप्रशाखानां वैशिष्ट्यं प्रकाशितं विद्यते । सर्वैः फलवेदिभिः फलोपजीविभिश्च निबन्धोऽयं पठनीयम् ।

अनेन कृतेन पूर्वाध्ययनपर्यावलोकनेन सर्वत्र ज्योतिषशास्त्रस्यैव विकासक्रमस्य कालवर्गीकरणं विहितमस्तीति बुध्यते । परन्तु फलितज्योतिषशास्त्रस्य पृथक् वैशिष्ट्ययुतः विकासक्रमः तस्य कालवर्गीकरणम्, विषयविभागानां शाखाप्रशाखानाञ्च विकासक्रमोल्लेखपुरस्सरं कृताध्ययनमद्यपर्यन्तं यत्र कुत्रापि न लभ्यते । पूर्वाचार्यैः फलितज्योतिषान्तर्गतयोः संहिताहोराशास्त्रयोरितिवृत्तं पृथक् पृथक् वर्णितो

विद्यते तथापि फलितज्योतिषशास्त्रस्य विषयविभाजनसहितस्य विकासक्रमस्य कालवर्गीकरणकार्यञ्च अवशिष्टं दृश्यते । तमभावं प्रपूरणाय शोधकार्यमिदं विहितमस्ति ।

## विषयविश्लेषणम्

### ज्योतिषशास्त्रस्य प्रवर्तनोद्भवश्च

पौरस्त्यज्योतिषशास्त्रं गुरुशिष्यपरम्परादुद्भूतं प्रवर्तितमद्यपर्यन्तं नूतनचिन्तनान्वितेन ग्रन्थकाराचार्येण कृतं शाखाप्रशाखासु पुष्पितं पल्लवितं विकसितं च विद्यते । शास्त्रमिदं प्रथमं ब्रह्मणा वेदविहितयज्ञप्रवर्तनाय सृष्टवान् । वेदाः यज्ञप्रवृत्ताः सन्ति । यज्ञास्तु कालाश्रयेण प्रोक्ताः। ज्योतिषशास्त्रात् हि यज्ञकालबोधो भवति । अतः शास्त्रमिदं वेदाङ्गत्त्वमावहति । वेदाङ्गत्त्वेन ब्रह्मणा यज्ञार्थं कालविधायकं ज्योतिषशास्त्रं विनिर्मित्य स्वशिष्याय नारदाय प्रोवाच । नारदश्च शास्त्रस्यास्य महत्त्वमङ्गीकृत्य लोके प्रवर्तयामासः । मतान्तरानुसारेण ग्रहाणां चरितं ज्योतिषशास्त्रमिदं मयासुरकृतेन तपसा तोषितः सूर्येण तस्मै वारार्थिने मयासुराय प्रथमं प्रोक्तं ततश्च जगति प्रवर्तितमित्यपि मन्यते ।

नारदकश्यपपराशरादय अष्टादशाः ज्योतिषशास्त्रप्रवर्तका आर्षरूपेणा सम्मानिताः विद्यन्ते । ब्रह्मणा हि प्रवर्तितं शास्त्रमिदं ब्रह्मा नारदाय, सोमः शौनकाय, नारायणो वशिष्ठारामेशाभ्याम्, वशिष्ठः माण्डव्यावामदेवाभ्याम्, व्यासः स्वशिष्याय, सूर्यो मयाय, पुलहस्त्याचार्यो गर्गात्रिरोमकाचार्याश्च स्वस्वशिष्येभ्यः, पराशरो मैत्रेयाय च प्रोक्तवन्तः । अनेन ज्ञायते यदृषिमहर्षिभिरुपदिष्टं ज्योतिषशास्त्रमिदं ब्रह्मानारदगर्गपराशर प्रभृतिन्नृषिन् प्रावोचेति । सूर्यः मयायोपदिष्टं सूर्यसिद्धान्तं लोके सिद्धान्तज्योतिषनाम्ना विकसितं प्रचारितं विद्यते । तथैव पराशरो मैत्रेयाय शिक्षितं पाराशरहोराशास्त्रमपि लेके होराजातकं (फलितज्योतिषं) नाम्ना विकसितं प्रचारितं वर्तते । अतो ज्योतिषशास्त्रं आर्षगुरुशिष्यपरम्परातः समुद्भूतं स्वस्वशिष्यपरम्परातः प्रवर्तितं पुनरार्यभट्टब्रह्मगुप्तवराहमिहिरभाष्कराचार्यकृतः ग्रन्थपरम्परातः विकसितं टीकाकाराणां विवृत्तिव्याख्याविश्लेषणात् पल्लवितं पुष्पितञ्च विद्यते । फलितज्योतिषशास्त्रं तस्य मूलञ्च ज्योतिषमिति विषये बहूनां जनानां मनसि वस्तुतः फलादेशपरकं शास्त्रमिति बुध्येते । मानवानां जिज्ञासा भविष्यज्ञाने रुचिः च स्वाभाविकी वर्तते । कतिपये तद्विषयज्ञाश्च तेषां फलादेशविधायकं शास्त्रमेव ज्योतिषमिति वदन्ति । मुख्यतः वैदिकपरम्परायां ज्योतिषमिति वेदाङ्गत्वेन कालविधानशास्त्रम् । यथा लगधोक्ते वेदाङ्गज्योतिषे वर्णितं यज्ञकालविधायकं शास्त्रं ज्योतिषं तथा चार्यभट्टवराहमिहिरभाष्करादिकृते ग्रन्थे सोपपत्तिवर्णितं ग्रहगतिगणनीयशास्त्रं खगोलीयशास्त्रं गणितज्योतिषं सिद्धान्तज्योतिषं वा । अपरं च

कालानुसारेण ग्रहगतिस्थित्यनुसारेण च फलादेशविधायकं ज्योतिषशास्त्रमेव फलितज्योतिषमिति । यथा चन्द्रसूर्योपराग–संक्रान्ति–व्यतिपात–वैधृति–गजच्छायैकादश्यामावस्यादि पुण्यकालकथनाद् यज्ञानां कालव्यञ्जकत्वात् श्रुतिस्मृतिपुराणोक्त–कालकथनात्तत्कात्र्स्न्येन संहितायाः फलविधानशास्त्रं तथा च जातकानां प्राक्तनकर्मविपाकात् होरायाः शुभाशुभफलज्ञापकशास्त्रं हि फलादेशविधायकं फलितज्योतिषशास्त्रमिति कथयन्ति बुधैः । केषाञ्चिन्मते फलितज्योतिषं वैदिकपरम्परायां नासीदित्यपि श्रुयते ।

यद्यपि वैदिकपरम्परायां वेदाङ्गज्योतिषे पारष्करादिषु गृहसूत्रेषु मनुयज्ञवल्क्यादिषु स्मृतिषु च यज्ञकालनिर्धारणे तिथि नक्षत्रादीनां शुभाशुभत्वं विचारो वर्तते । वैदिकसूक्तेषु शकुनादीनां विचारो वर्तते। नक्षत्रचक्रस्य ( श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यत्तम्), नक्षत्रदर्शस्योल्लेखो वेदेऽपि वर्तते । परं वैदिकपरम्परायां फलितज्योतिषं नासीदिति तत्परम्पारनुशीलजनाः कथयन्ति । शुभतिथि, शुभनक्षत्रस्य च तत्रोल्लेखनाद् तत्रापि शुभफलस्यैव गतार्थो विद्यते । जन्मपत्रिकानिर्माणे फलादेशादिषु च प्रयुक्तस्य आधुनिकस्य फलितज्योतिषस्य मूलञ्चार्यभट्टवराहमिहिरभास्करकृतगणिताश्रित्य संहिताहोराजातकप्रश्नताजिक-स्वरस्वप्नाधारेण फलादेशविधायकं शास्त्रमस्ति । अतः सम्प्रति संहिताशास्त्रं होराशास्त्रञ्चेति फलितज्योतिषशास्त्रस्य मूलमिति ।

इत्थं वेदाङ्गत्वेन आर्षगुरुशिष्यपरम्परातः प्रवर्तितं वैदिककालादेव विकसितं ज्योतिषशास्त्रं कालान्तरे त्रिषु स्कन्धेषु विभज्य वराहमिहिराचार्येण सिद्धान्तसंहिताहोरेति नाम्नः विश्लेषितम् । त्रिस्कन्धेषु प्रथमतः संहिताशास्त्रं स्मरन्ति केचिदाचार्याः । परन्तु सिद्धान्तसंहिताहोरेति त्रिस्कन्धेषु विभाजितेषु मध्येषु सर्वैराचार्यैः स्वीकृते प्रथमे सिद्धान्तस्कन्धे ग्रहगतिविषयको गणितज्योतिषं सिद्धान्तोऽस्ति । प्रमाणैः सिद्धं ग्रहगतिविषयीयशास्त्रमेव सिद्धान्तज्योतिषमर्थादुपपत्तियुक्तं खगोलीयशास्त्रमेव सिद्धान्तज्योतिषम् । सम्प्रति गणितज्योतिषमिति नाम्नापि व्यवह्रियते । सिद्धान्तज्योतिषं विशेषरूपेण आर्यभट्टस्यावदानादाधुनिकपद्धतौ प्रस्फुटितमासीत् । ततो वराहमिहिरो ब्रह्मगुप्तो लल्लाचार्यः श्रीपतिर्भाष्कराचार्यः कमलाकरादयकृतग्रन्थात् सिद्धान्तज्योतिषं विकसितं विद्यते । सिद्धान्तस्कन्धात् प्रमाणितानि गणितागतानि प्रमाणानि एव संहिताहोरयोर्विभागयोः प्रयुक्तानि फलितानि विद्यन्ते ।

वराहमिहिराचार्येण विवेचितयोः संहिताहोराशास्त्रयोर्नामैव अद्यतनेऽस्मिन् युगे फलितज्योतिषनाम्ना विकसितं प्रसिद्धाख्यातञ्च विद्यते। वराहमिहिरश्रीपतीद्वावाचार्यौ त्रिस्कन्धज्ञावस्ताम् । श्रीपतिना विकसितायां होराशास्त्रपरम्परायां सम्प्रति श्रीपतिपद्धतिरेवोपलभ्यते। तस्य शिष्यपरम्परायां सिद्धान्तसंहिताशास्त्रस्य निरन्तरता विलुप्ता जाता। अतः फलितज्योतिषशास्त्रस्य विकासाय प्रथममाचार्य वराहमिहिरस्य योगदानं

महनीयं स्मरणीयञ्च विद्यते । अस्य व्याख्यानेन हि फलितज्योतिषस्य शाखाप्रशाखा सम्यक् रूपेण विकसिता दृश्यन्ते।

ज्योतिर्वाङ्मये संहिताहोरयोः शाखया सह जातकः, ताजिकः, वास्तु, मुहूर्तः, प्रश्नः, स्वरः, शकुनः, स्वप्नादयोपशाखाऽपि कालान्तरेणा व्यावहारिकप्रयोगे विकसिता प्रचारिताश्च विद्यन्ते । तासां शाखानामुद्भवस्तु ज्योतिःशास्त्रप्रवर्तकानामार्षाचार्याणां संहिताग्रन्थोक्तवचनादभवदित्यनुमीयते । कालान्तरे वराहमिहिरादेव संहिताशास्त्रस्य विभागाः होराशास्त्रस्य विभागाश्च विभाजिताः विद्यन्ते । अग्रे संहिताहोराशास्त्रयोः ग्रन्थप्रवृत्तिगतं विकासक्रमं प्रस्तूयते ।

**संहिताशास्त्रस्य विकासक्रमः**

त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य द्वितीयस्कन्धः संहिताभागः प्राणिमात्रे ग्रहचारप्रभावं कालस्थितिञ्च निरूपयति । सामान्यतः सूर्यादिनां ग्रहाणां नक्षत्रेण सहोदयेन प्राणिषु संभवः प्रभावः, ग्रहकृत् परिवर्तनं तद्प्रभावश्च, वास्तुविद्या, रत्नपरीक्षा, स्वरशकुनादयो निरूपणीयविषयत्वेनान्यतमं संहिताशास्त्रम् । अतः संहितास्कन्धः सार्वत्रिकफलप्रकाशको बहुविषयान्वितः । संभवतः संहिताशास्त्रं सिद्धान्तज्योतिषादपि प्राचीनतरं प्रतीयते । अस्य हि पर्याप्तसामग्री वैदिकसंहितायां वैदिकसाहित्ये च समुपलभ्यते । इदमनुमीयते यद् वेदाङ्गज्योतिषपर्यन्तं संहिताशास्त्रस्य पृथग्विस्तारं नासीत् । अस्य शास्त्रस्य पृथक् शास्त्रत्वेन कदोदयो जात इति तु न शक्यते वक्तुम् । आर्षसंहितायां अस्य प्रारम्भिकं स्वरूपं परिदृश्यते । ततो वराहमिहिराचार्यस्य बृहत्संहिता एवास्य शास्त्रस्य लौकिकग्रन्थत्वेन प्रतिष्ठा वर्द्धितः । अतः संहिताशास्त्रस्य विकासक्रमं बृहत्संहितायाः केन्द्रवर्तित्वेन प्राचीनार्वाचीनेति द्विचरणयोर्विभज्य अध्येतुं शक्यते । प्राचीनकालः चतुर्षूपचरणेष्वाधुनिककालश्च त्रिषूपचरणेषु विभज्य तेषां वैशिष्ट्यं अत्रोपस्थाप्ते । तद्यथा –

संहिताशास्त्रविकासस्य प्रचीनकालः

वैदिकसंहिताकालः

प्राचीनार्षसंहिताकालः

वेदाङ्गज्योतिषकालः

वाराहिसंहितापूर्वकालः

संहिताशास्त्रविकासस्याधुनिककालः

ग्रन्थप्रणयनकालः

व्याख्याविवृत्तिटीकालेखनकालः

ग्रन्थसंग्रहकालः

**वैदिकसंहिताकालः (ऋग्वेदसंग्रहकालाद् – आर्षसंहिताग्रन्थप्रणयनकालपर्यन्तम् )**

ऋग्वेदादिवैदिकसंहितासु यादृश्याः संहितायाः विषयमुपलभ्यते तदाधारेण तत्रस्थितायाः संहिताविषयकस्वरूपमनुमीयते । कालोऽयं ऋग्वेदसंग्रहकालाद् – आर्षसंहिताग्रन्थप्रणयन कालपर्यन्तं प्रचलति । ऋग्यजुसामाथर्वसंहितासु गगनमण्डलम्, सूर्यचन्द्रमसौ, नक्षत्राणि, ताराः, ऋतुन्, मासान्, दिवसाश्चादय मनोहारि चमत्कारि वर्णनं समुपलभ्यते । अतः वैदिकसंहिताया उक्तविषया संहिताशास्त्रस्य पूर्वपीठिका रूपेणाधारपदं दिशन्ति । तस्मादेवार्षसंहिताया विकासो जात इत्यनुमीयते । चरणेऽस्मिन् संहिताशास्त्रस्य ग्रन्थत्वेन पृथगस्तित्त्वं नैवासीत् । वैदिकऋक्षु संहिताविषयिका चूर्णिका विकीर्णा विद्यन्ते। तासामुपजीव्यत्वेन आर्षसंहिताकालो वेदाङ्गज्योतिषकालश्च विकसितो विद्यते ।

**आर्षसंहिताकालः**

आर्षसंहिताकालोऽयं वसिष्ठ–काश्यप–पराशर–भृगु–गर्ग–नारदादिभिः ऋषिभिरुपदिष्टं संहिताग्रन्थप्रणयनकालम् । कालोऽयं कदा प्रारम्भ इति वयमनुमातुं न शक्नुमः । ऋषिमहर्षिभिः प्रणीतत्त्वेन संहिताविषयकत्त्वेन ज्ञानेन कालोऽयमार्षकालसंज्ञकम् । कालेऽस्मिन् महर्षिपराशरः (सत्यपूर्वः), नारदः, वसिष्ठः, गर्गः, बृहस्पतिः, कश्यपः, स्वस्वसंहिताविषयकं ज्ञानमुपदिष्टवन्तः । यथा पराशरसंहिता, नारदसंहिता, वसिष्ठसंहिता, कश्यपसंहिता, भृगुसंहिता चेदानीं श्रूयन्ते समुपलभ्यन्ते च । आर्षेषु प्रथमं ग्रन्थत्वेन नारदसंहिता लभ्यते सम्प्रति सर्वत्र । इतः परं भृगुसंहिताऽपि खण्डत्वेन लभ्यते । सम्प्रति रावणसंहिताऽपि दृष्टिपथमायाति । वराहमिहिरोऽपि आर्षसंहिताग्रन्थाधृत्य वाराहिसंहिता रचयामासेति वयमनुमातुं शक्नुमः । मिहिरः स्वग्रन्थे आर्षसंहिताग्रन्थाः स्मरति समुद्धरति च । अत अधुनोपलब्धस्य संहिताशास्त्रस्य वाराहिसंहितायाश्च उपजीव्यस्रोतांसि आर्षसंहिताग्रन्थरत्नानि आसन् इति अस्य कालस्य प्रमुखवैशिष्ट्यं वर्तते ।

**वेदाङ्गज्योतिषकालः**

आर्षसंहितोत्तरवर्तिकालो लगधस्य वेदाङ्ज्योतिषादारभ्य वराहमिहिरस्य बृहत्संहितायाः प्रणयनपूर्वपर्यन्तं प्रचलति । वेदाङ्गज्योतिषे संहिताविषयकं वर्णनमधिकतरं नास्ति तदाऽपि यज्ञकालविषयकं वर्णनं तत्र लभ्यते। एवमेव युगः संवत्सर अयन ऋतुः मासः दिनः तिथिः नक्षत्रः मुहूर्तविषयकं वर्णनं उपलभ्यते । अतः लगधप्रोक्तात् वेदाङ्गज्योतिषाद् ज्योतिषशास्त्रस्य स्पष्टतरो विकासारम्भोऽभवत् । तत्र ज्योतिषशास्त्रस्य त्रिषु स्कन्धेषु स्पष्टतया विभाजनं तु नैव परन्तु पञ्चाङ्गाभिर्भावश्चास्य कालस्य मूलं वैशिष्ट्यं वर्तते । अत्रैवात्

फलितज्योतिषस्य विविधशाखाप्रशाखा विकसिताः। ऋग्ज्योतिषम्, याजुषज्योतिषम्, आथर्वणज्योतिषञ्चेति वेदाङ्ज्योतिषस्य त्रीणि वर्त्मानि विद्यन्ते । आथर्वणज्योतिषे फलितज्योतिषस्य (विशेषतः संहिताहोराशास्त्रयोः) विविधा विषया विलसिता सन्ति । इदं हि फलितज्योतिषेन सम्बद्धमस्ति । ग्रहबलाबलं सूर्यचन्द्रयोः शुभाशुभप्रभावः, सप्तदिनाधिपाश्च तत्र वर्णिताः सन्ति । मेषादिराशीनामुल्लेखस्तत्र नैव दृश्यते इति राशिप्रचलनादस्य प्राग्वर्तित्वं स्पष्टमेव सिद्ध्यति । वस्तुतोऽयं संहिताग्रन्थ एव । तेनात्र प्रसङ्गात् सिद्धान्तो होरा च समुपदर्शिता संक्षेपतः।

**आर्षसंहितोत्तरवर्ती वाराहिसंहितापूर्वकालः**

कालेऽस्मिन् वाराहिसंहितापूर्ववर्तिनामाचार्याणां संहिताग्रन्थाः प्रचलिता आसन् इति बृहत्संहितायामुल्लेखनाद् ज्ञायते । वराहमिहिरपूर्वर्तिनामाचार्याणां स्मरणं बृहत्संहितायां समुपलभ्यते । मणित्थः, सत्याचार्यः, चाणक्यः, भदीप्तः, लल्लदेवः द्रव्यवर्धनः, जीवशर्मा, पौलिषाचार्यः, धानुभट्टः, यवनाचर्यः, सिद्धसेनप्रवृत्तीनामाचार्याणां स्मरणेन संहिताशास्त्रस्य प्रवर्द्धनाय विकासाय च तेषामवदानं आसीदिति भणितुं शक्यते । तेषामाचार्याणामुपजीव्यतायामेव वराहमिहिरेण संहिताग्रन्थः रचयामास। तस्मादेव संहिताशास्त्रस्य स्पष्टतरस्वरूपं प्रचुरतरविकासश्चाभवदिति ।

**संहिताशास्त्रविकासस्याधुनिककालः**

पौरुषेयेषु संहिताग्रन्थेषु ज्ञातेषु वराहमिहिरविरचिता बृहत्संहिता ( चरनाकालः शकाब्दे ४२७, वैक्रमाब्दे ५६२) हि आद्यत्वेन कालोऽयं आधुनिककालः । मनुजकृतग्रन्थत्वेन संहिताग्रन्थरचनोपलब्धकालोऽयं आधुनिकसंज्ञाप्रदातुं समुचितं प्रतीयते । अस्मादेव ज्योतिषफलज्ञापका विषयाः प्रस्फुटिताः । अतः फलितज्योतिषस्याधुनिककालोऽपि अस्मादेवकालाद् विकसितः ।

ज्योतिषशास्त्रस्य सिद्धान्तसंहिताहोराख्यान् त्रिविधान् भेदान् प्रस्फुटनेन वराहेण फलितज्योतिषस्य प्रस्थापनमुन्नयनञ्चाकरोत् । अतो वराहमिहिरः फलितज्योतिषशास्त्रस्य प्रस्थापनपरमाचार्यरूपेण पूज्यते स्मर्यते च । अनेन नैकान् विषयान् समायोज्य संहितास्कन्धस्य प्रवर्द्धने महत् योगदानमकरोत् । बृहत्संहिता अस्य साक्षात् प्रमाणमस्ति । अस्मात् कालादेव संहिताशास्त्रान्तर्गतानि अन्यान्यानि अङ्गानि विकसितानि दृश्यन्ते। मुहूर्तः, सामुद्रिकः, वास्तु, शकुन, स्वरादिका विषयविलसिता ग्रन्थाः प्रणीता विद्यन्ते पश्चाद्वर्तिकाले संहिताभागे मुहूर्तविषयका वास्तुविषयविभूषिता ग्रन्थाः प्रचुरतरविरचिताः तट्टीकाव्याख्याश्च प्रणिता विद्यन्ते । ग्रन्थसंग्रहाश्च कृता विद्यन्ते । संहिताशास्त्रस्याधुनिककलोऽयं ग्रन्थप्रणयनकालो व्याख्याकालः संग्रहकालश्चेति

त्रिषु चरणेषु विकसितं विस्तारितञ्च विद्यते । कालोऽयं राज्याश्रयेण पुष्पितं पल्लवितं विकसितं च। ग्रन्थप्रणयनप्रवृत्तित्त्वेन कालस्यास्य त्रिणि चरणानि परिदृश्यन्ते ।

**ग्रन्थप्रणयनचरणम्**

चरणेऽस्मिन् संहिताशास्त्रजन्याः मुहूर्तवास्तुस्वरशकुसम्बद्धाः ग्रन्थाः प्रणिताः विद्यन्ते । वराहमिहिरविरचितायाः बृहत्संहितायाः प्रणयनाच्चरणोऽयं (४२७ शकाब्दात् ५६२ वैक्रमाब्दात् वा) प्रारभ्यते। अस्मिन् चरणे मुहूर्तवास्तुस्वरशकुनशास्त्राणां प्रचुरविकास अभवत् । ते चैथा लल्लाचार्यस्य रत्नकोशः (वि.सं. ६९५), श्रीपत्याख्येन विदुषा प्रणीतः रत्नमाला (वि.सं. १०९६) , रघुवंशादिकाव्यप्रणेत्रा कलीदासेन प्रणितो ज्योतिर्विदाभरणम् ( ? ), अद्भूतस्य अद्भूतसागरम् (वि.सं.१२२४), कविनरपतेः नरपतिजयचर्यास्वरोदयः (१२३३ मितवैक्रमाब्दे), दैवज्ञकेशवस्य विवाहवृन्दावनम् (१२९० मितवैक्रमाब्दे अनुमानितः), कमलाकरसुतकेशवस्य मूहूर्ततत्त्व (१५३५ मितवैक्रमाब्दे), दैवज्ञनारायणस्य मुहूर्तमार्तण्डः (१६२८ मितवैक्रमाब्दे), दैवज्ञशिवस्य मुहूर्तचूडामणिः (१६७५ मितवैक्रमाब्दे ) दैवज्ञरामस्य मुहूर्तमचिन्तामणिः (१६७७ मितवैक्रमाब्दे), गणपतिदैवज्ञस्य मुहूर्तगणपतिः ( १७४२ मितवैक्रमाब्दे ) रामाख्यदैवज्ञस्य समरसारः ( १७९६ मितवैक्रमाब्दे ) दैवज्ञसूर्यदासस्य सुतस्य रामस्य कृतिः समरसारः (१८०६ मितवैक्रमाब्दे), गङ्गाधरशास्त्रीविरचितः मुहूर्तसिन्धुः (१९४० मितवैक्रमाब्दे ), मातृकाप्रसादपाण्डेयस्य गृहरत्नभूषणम् ( २०१३ मितवैक्रमाब्दे) प्रभृतयः संहिताशास्त्रविषयकाः स्वतन्त्ररचना सन्ति । संहिताशास्त्रस्य ग्रन्थप्रणयनचरणोऽयं स्वर्णयुगमासीत् । अस्मिन् चरणे रचितानां ग्रन्थानां गूढार्थान्वेषणे टीकाकतृर्भिरर्थगौरवयुता टीकाव्याख्या च कृता विद्यन्ते । अनेन टीकाव्याख्याकरणेन द्वितीयचरणारम्भः ।

**व्याख्याटीकाकृतचरणम्**

चरणेऽस्मिन् संहिताशास्त्रसम्बद्धग्रन्थानां विस्तृतविवरणान्विताः व्याख्या शास्त्रान्तरप्रमाणयुताः संस्कृतटीका च रचिताः विद्यन्ते । भट्टोत्पलः (१०२३ मितवैकेमाब्दे, ८८८ मितशकाब्दे वा ) बृहत्संहितायाः विस्तृतव्यख्यान्विता भट्टोत्पल्ली टीका कुर्वनस्य चरणारम्भः कृतः। बृहज्जातकस्य चानेन गूढार्थप्रकाशिका टीका कृता । तथैव गोविन्दस्य मुहूर्तचिन्तामणेः पियूषधाराटीका मुहूर्तमार्तण्डस्य मार्तण्डवल्लभा टीका च चरणेऽस्मिन् रचिताः । मुहूर्तचिन्तामणेः प्रतिमाक्षरा टीका अपि प्रसिद्धैव ।

**ग्रन्थसंग्रहचरणम्**

चरणेऽस्मिन् संहिताविषयसम्बद्धानां प्राचीनाचार्याणां मतग्रथिताः ग्रन्थसंग्रहकरणे संहिताविद्विद्वांस अभिप्रेरिताः सन्ति । विशेषतः वास्तुविषयकग्रन्थाः टोडरानन्दः (वि.सं.१६४०) बृहद्वास्तुमाला, वास्तुप्रदीपः गृहरत्नभूषणञ्चेति ग्रन्थाः संग्रहिता विद्यन्ते ।

**होराशास्त्रस्य विकासक्रमः**

सिद्धान्तसंहिताहोरा इति त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य तृतीयस्कन्धः होराशास्त्रमुच्यते। होराशास्त्रं जातकं ताजिकञ्च इत्युक्त्यनुसारं यत्र जातकसम्बन्धेन वैयक्तिकः फलादेशः क्रियते सा होरा । जातकानां शुभाशुभज्ञापकशास्त्रं होराशास्त्रम् । ज्योतिषशास्त्रस्य विकास यादृशो वर्तते होराशास्त्रस्याऽपि विकासः तादृश एव । वस्तुतः प्राचीन कालादेव होराशास्त्रे पञ्चविभागाः पुष्पिताः विकसिताः फलिताश्च । ते च जातकं ताजिकं रमलं प्रश्नः स्वप्नश्चेति विद्यन्ते । एतेषु पञ्चभागेषु विकसितस्य होराशास्त्रस्य विकासक्रमं चरणपञ्चधा विभज्याधीयते । आचार्यलोकमणिदाहालः भारतीय–ज्योतिषशास्त्रस्येतिहासः इत्याख्ये स्वविरचिते पुस्तके ज्योतिषशास्त्रस्य विकासक्रमः चरणपञ्चत्त्वेन प्रस्तौति । ते च प्राग्वैदिककालः, वैदिकसंहिताकालः, वेदाङ्ककालः, सिद्धान्तकालश्चेति । अथवा अज्ञातकालः, आदिकालः, पूर्वमध्यकालः, उत्तरमध्यकालः, आधुनिककालश्चेति । तेषामाधारभित्तयः स्वीकृत्य अत्र होराशास्त्रस्य विकासक्रमं सम्प्रत्युपलब्धग्रन्थाधारे प्रस्तूयते ।

वस्तुतः होराशास्त्रं प्राचीनकालादेव गुरुशिष्यपरम्परातः प्रवर्तितं विकसितञ्च वर्तते । शास्त्रमिदं प्रथमं ब्रह्मणा यज्ञप्रवर्तनाय सृष्टवान् । ब्रह्मा कालबोधकं ज्योतिशास्त्रं विनिर्माय नारदाय प्रोवाचः । नारदश्च लोके प्रवर्तयामासः ब्रह्माद्यष्टादशज्योतिष्शास्त्रप्रवर्तकाचार्याः विद्यन्ते । तेषां शिष्यप्रशिष्यतच्छिष्यपरम्परायां होराशास्त्रं विकसितमासीत् । उक्त गुरुशिष्यपरम्परायां पराशरो मैत्रेयायोपदिष्टं पाराशरहोराशास्त्रमपि लोके प्रचारितं विकसितं इदानिन्तनं समुपलब्धं च । एतत्तु प्राचीनहोराशास्त्रस्य विकासक्रमो पाराशरीये होराशास्त्रे उल्लिखितो वर्तते –

नादाय यथा ब्रह्मा शौनकाय सुधाकरः । माण्डव्यवामदेवाय वसिष्ठो यत्पुरातनः ।।
नारायणो वसिष्ठाय रामेशायपि चोक्तवान् । व्यासः शिष्याय सूर्योऽपि मयारुणकृते स्फुटम् ।।
पुलस्त्याचार्यगर्गोऽत्रि रोमकादिभिरीरितम् । विवस्वता महर्षिणा स्वयमेव युगेयुगे ।।
मैत्रेयाय मयाप्युक्तं गुह्यमध्यात्मसंज्ञकम् । शास्त्रमाद्यं तदेवेदं लोके यच्चातिदूर्लभम् ।।

ततः वराहमिहिरेण व्यख्यातं होराशास्त्रमाधुनिकस्वरूपं प्राप्नोति । एतेन होराशास्त्रस्य विकासः प्राचीनाधुनिककाले वर्गीकृत्यात्राधीयते ।

त्रिस्कन्धात्मकस्य ज्योतिःशास्त्रस्य व्यख्याताचार्यस्य वराहमिहिरस्य विश्लेषणेन होराशास्त्रस्य आधुनिकस्वरूपमं विकसितं विनिर्मितञ्चास्ति । अतः मिहिरपूर्ववर्तीकालः प्रचीनकालः तदुत्तरवर्तिकालश्चाधुनिककाल इतिमत्त्वा प्रचीनाधुनिक भेदेन होराशास्त्रस्य विकासक्रमः स्थूलकालत्वेन द्विधा सूक्ष्मकालात्त्वेन पञ्चधा विभज्यते । तद्यथाः

**होराशास्त्रस्य प्राचीनार्षकालः ( आधारकालः पृष्टभूमिकालो वा )**

वराहमिहिराद् पूर्वकालः होराशास्त्रस्य प्राचीनार्षकालः । होराशास्त्रस्य स्फूटरूपमात्र न निर्मितः । अतः कालोऽयं होराशास्त्रस्य विकासस्याधारकालः पृष्ठभूमिकालो वा कथितुं शक्यते । ऋग्वेदादि वैदिकसंहितायां वैदिकसूक्तेषु ऋक्क्षु आर्षग्रन्थेषु लगधप्रोक्ते वेदाङ्गज्योतिषे च होराशास्त्रसम्बद्धविषयचूर्णिकाः विलसिताः विद्यन्ते । अतः प्राचीनार्षकाले होराशास्त्रं वैदिकसंहितावेदाङ्गज्योतिषार्षग्रन्थतदुत्तरेषु चतुर्षु चरणेषु विकसितं दृश्यते ।

**वैदिकसंहिताकालः (ऋग्वेदसंग्रहकालाद्–लगधप्रोक्तवेदाङ्गज्योतिषकालपर्यन्तम् )**

ऋग्यजुसामाथर्वसंहिताषु होराया यादृशं विषयमुपलभ्यते तदाधारेण तत्र स्थितायाः होरायाः स्वरूपं परिकल्पितुं शक्यते । कालोऽयं ऋग्वेदमन्त्रसंग्रहकालाद् लगधोक्तवेदाङ्गज्योतिषकालपर्यन्तं प्रचलितं वर्तते । वैदिकसूक्तेषु वैदिकमन्त्रेषु च नक्षत्राणि, अहोरात्रात्मिका दिनव्यवस्था च वर्णितं प्राप्यते । अतः होराशास्त्रसम्बद्ध अहोरात्रशब्दोऽयं वैदिकऋक्क्षु प्राप्यते । वेदोक्तः नक्षत्रक्रमः कृत्तिकातः प्रारभ्यते । तथैव वैदिकसूक्तेषु ऋक्क्षु च संवत्सरः अयनः, ऋतु, मासः, पक्षः, तिथिः, नक्षत्राणि, दिनम्, मुहूर्तादयः विषयानां वर्णनं समुपलभ्यते । अतः वैदिकसंहिताकालः होराशास्त्रस्य पूर्वपीठिका रूपेण संप्रतिष्ठतिः । कालेऽस्मिन् होराशास्त्रस्य पृथगस्तित्त्वं भिन्नस्वरूपं च नैवासीत् । वैदिकऋक्क्षु मन्त्रेषु गीतेषु वा केवला होराविषयिकाः चूर्णिकाः विकीर्णाः सन्ति । तासां उपजीव्यत्त्वेनार्षग्रन्थाः वेदाङ्गज्योतिषग्रन्थाश्च विकसिताः दृश्यन्ते । ततश्च होराशास्त्रस्य प्राचीनार्षग्रन्थकालो विकसितो जात इति वयमनुमातुं शक्यामहे ।

**प्राचीनार्षग्रन्थकालः**

प्राचीनार्षकालोऽयं पराशर-भृगु-गर्ग-नारद-वसिष्ठ-जैमिनिभिः प्रणीतानां मौलिकानां होरा-जातक-प्रश्नादिविषयकानां ग्रन्थानां प्रणयनकालो वर्तते । अष्टादशज्योतिःशास्त्रप्रवर्तकेन ऋषिमहर्षिभिश्च प्रणीतेन

होराविषयकज्ञानेन कालोऽयमार्षकालो मन्यते । अस्मिन् काले महर्षिपराशरो नारदो गर्गो भृगुः जैमिन्यादय ऋषयः स्वस्वहोराविषयकं ज्ञानं स्वस्वशिष्याय उपदिष्टवन्तः ।

सम्प्रति आर्षत्वेन पराशरभृगुजैमिनिमुनिभिः प्रणीताः कतिपये होराशास्त्रसम्बद्धा ग्रन्था लभ्यन्ते । तेषु पराशरस्य पाराशरहोराशास्त्रं भृगोर्भृगुसूत्रं भृगुसंहिता (फलितभाग) च नारदस्य नारदीयहोराशास्त्रं प्रश्ननारदि च जैमिनिसूत्रं जैमिनिमुनेः शुकदेवस्य शुकसूत्रञ्चेति समुपलभ्यन्ते । तेषां रचनाशैली विषयविभाजनं चार्वाचीना प्रतीयते । बृहज्जातकस्य टीकायां भट्टोत्पल एतेषां स्मरणं करोति । आर्षमतोद्धृतानि पद्यानि च स्मरति । तेष्वार्षग्रन्थेषु मेषादीनां राशीनां वैशाखादीनां मासानां रव्यादीनां सप्तवाराणाञ्चोल्लेखनेन कालोऽयं वेदाङ्गज्योतिषादुत्तरवर्त्तित्वं वृणोति। वेदाङ्गज्योतिषे द्वादशराशीनां सप्तवाराणां सूर्यादिग्रहाणां चोल्लेखाभावादार्षग्रन्था तदुत्तरकालबोधकास्तु नैव । अतो लगधप्रोक्तं वेदाङ्गज्योतिषं तद्भिन्नपरम्पराबोधकं वाऽनुभूयते । विषयोऽयं पुनरन्वेषणीयो दृश्यते ।

**लगधप्रोक्तो वेदाङ्गज्योतिषकालः**

वेदाङ्गज्योतिषकालोऽयं वैदिकसंहितोत्तरवर्त्तिकाले प्रणीतानां आर्षग्रन्थानां प्रणयनकालाद् भिन्नपरम्पराबोधककालो वा इति लगधप्रोक्ताद्वेदाङ्गज्योतिषादवगम्यते । कालेऽस्मिन् लगधोक्ते वेदाङ्गज्योतिषे होराशास्त्रविषयकं ज्ञानमधिकं नैव विद्यते । तदापि यज्ञकालविषयकवर्णनप्रसङ्गे होराशास्त्रजन्या तिथिनक्षत्रादिविषयास्तत्र लभ्यन्ते, परन्तु मेषादीनां राशीनां वैशाखादीनां मासानाञ्चोल्लेखो नैव विद्यते । तत्र ज्योतिषशास्त्रस्य त्रिषु स्कन्धेषु स्पष्टतया विभाजनन्तु नैव लभ्यते परन्तु पञ्चाङ्गस्याविर्भावश्चास्य कालस्य मूलं वैशिष्ट्यमस्ति । कालेऽस्मिनाथर्वणज्योतिषे होराशास्त्रस्य विविधविषया विलसन्ति । ग्रहबलाबलं सप्तदिनस्याधिपाः चन्द्रस्य शुभाशुभप्रभावाश्च वर्णिताः सन्ति । अतः कालोऽयं होराशास्त्रविकासायोपजीव्यतां प्रयच्छति । होराशास्त्रविकासस्य पूर्वपीठिकारूपेण प्रतिष्ठति ।

**प्राचीनार्षोत्तरवर्तिकालो वराहमिहिरपूर्ववर्तिकालो वा**

कालोऽयं प्राचीनाधुनिककालयोः सन्धिकालः । वराहमिहिरेण स्वपूर्वाचार्याणां स्मरणेन तेषां मतमुद्धृतेन च कालोऽयं बुधैः तद्पूर्ववर्त्तित्वं मन्यते । वराहमिहिर-कल्याणवर्मा-भट्टोत्पलादय आचार्या वराहमिहिरपूर्वाकालिकानामाचार्याणां होराविषयकं मतं सपाद्य समुद्धरन्ति । पूर्वाचार्याणां मतं स्मरणेन अस्य पृथग्वैशिष्ट्यमावहति ।

अस्य कालस्य सर्वेऽपि ग्रन्थाः सम्प्रति प्रायो विलुप्ताः । मिहिरमहोदयेन स्वग्रन्थे तेषां स्मरणं कृतम् । तेषु मययवनमणित्थसत्यजैवविष्णुदेवस्वामीसिद्धसेनवादरायणप्रभृतीनां आचार्याणां स्मरणेन कालोऽयं लोके

होराशास्त्रस्य प्रचारितप्रसारितकालो मन्यते । एतैराचार्यैः प्रणीतं होराशास्त्रं वराहमिहिरोऽसकृत् स्मरति । भट्टोत्पलश्च तेषां मतमसकृत्तत्रतत्रस्थले उद्धरति । एतेषामाचार्याणां होराशास्त्राणि लोकमणिदाहालः स्वकीये ग्रन्थे उल्लिखति । ते च यथा - मयासुरप्रणीतं मयहोराशास्त्रं, यवनाचार्यस्य यवनहोराशास्त्रम् (एतत्तु यवनऋषिप्रणीतमित्यपि मन्यन्ते केचिदाचार्याः), मणित्थाचार्यस्य मणित्थहोराशास्त्रम्, जीवशर्मणो जैवहोराशास्त्रं सत्याचार्यस्य सत्यहोराशास्त्रम्, विष्णुगुप्तस्य विष्णुगुप्तहोराशास्त्रम्, सिद्धसेनस्य सिद्धहोराशास्त्रम्, यवनेश्वरस्य यवनेश्वरहोराशास्त्रम्, वादरायणस्य वादरायणहोराशास्त्रमिति ।

अनेन वक्तुं शक्यते यद्धोराशास्त्रस्याधुनिककालस्य प्रवर्तने उक्तानि होराशास्त्राणि बहुश आधारभित्तयः प्रदर्शयन्ति । तेषामाधारे वराहमिहिरो जातकशास्त्रग्रन्थं बृहज्जातकं तत्पुत्रः पृथुयशः प्रश्नशास्त्रग्रन्थं षट्पञ्चाशिकाञ्च विरच्य होराशास्त्रस्याधुनिकपरम्परायां योगदानं कृतवान् ।

**होराशास्त्रस्याधुनिककालो विकासकालो वा**

सिद्धान्तसंहिताहोरेति त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य व्याख्याता वराहमिहिराचार्यस्य व्याख्यानेन होराशास्त्रस्याधुनिककालो विकसितो वर्तते । अस्यैवाचार्यस्य बृहज्जातकं पौरुषेयहोराग्रन्थेषु प्रथमम् । सप्रयोजनं होराशास्त्रस्य स्वरूपमनेनैवाचार्येण विनिर्मितं वर्णितञ्च । अस्य बृहज्जातकस्य रचनाकालाद् हि होराशास्त्रस्याधुनिककालो विकसितः पुष्पितः पल्लवितश्च । अतो मिहिरपूर्वकालः प्राचीनकालः तदुत्तरवर्तिकालश्चाधुनिककाल इति मत्वा होराशास्त्रस्यार्वाचीनविकासस्य दिग्दर्शनं भवति । आधुनिककाल एव होराशास्त्रस्य विकासकालः। अस्मादेव कालाद् होराशास्त्रे जातकः, ताजिकः, प्रश्नः, रमलः , सामुद्रिकः, स्वप्नादिभेदा विकसिता विद्यन्ते । तत्तद्विषयविभूषिता ग्रन्थाश्चास्माद् कालादेव प्रणीताः प्रचारिताश्च विद्यन्ते। वराहमिहिरः पृथुयशः कल्याणवर्मा वैद्यनाथः श्रीपतिः केशवदैवज्ञो गणेशदैवज्ञः ढुण्डीराजो जीवनाथो बलभद्रश्चैते केचन प्रसिद्धाः जातकग्रन्थकारा विद्यन्ते । अतः कालोऽयं होराग्रन्थस्य विकासकालत्वेनापि सम्बोध्यते । अत्र विकसितानि शास्त्राणि यथा-

(क) जातकशास्त्रस्य विकासः

(ख) ताजिकशास्त्रस्य विकासः

(ग) रमलशात्रस्य विकासः

(घ) प्रश्नशास्त्रस्य विकासः

(ङ) सामुद्रिकशास्त्रस्य विकासः

(च) स्वप्नशास्त्रस्य विकासः

**जातकशास्त्रस्य विकासः**

वराहमिहिरविरचितं बृहज्जातकं होराशास्त्रान्तर्गतस्य जातकशास्त्रस्य प्रथमपौरुषेयो लौकिको जातकग्रन्थः। वराहमिहिरस्य स्थितिकालः वि.सं. ५४२–६४४ मितवैक्रमाब्दत्वेन तदा एवास्य रचनाकालः प्रतीयते । अमुष्य लघुजातकं योगयात्रा च द्वौ ग्रन्थौ जातकशास्त्रे प्रसिद्धावेव। ततः कल्याणवर्मणः (वि.सं. ६३५ मितवर्षे अस्य स्थितिकालः) सारावलीः, श्रीपतेः (वि.सं. १०९६ मितवर्षे स्थितिकालः) जातकपद्धतिः रमलपद्धतिश्च द्वौ होराग्रन्थौ प्रसिद्धौ । श्रीपतिजातकपद्धतिरपि केचिद्वदन्ति । वैद्यनाथस्य जातकपारिजातः (वि.सं.१४८५) दैवज्ञकेशवस्य केशवीयजातकपद्धतिः (वि.सं १५५३), ढुण्डीराजस्य जातकाभरणम् (वि.सं १६१५ मितवर्षे रचनाकालः) दैवज्ञगणेशस्य जातकालङ्कारः (वि.सं. १६७० मितवर्षे रचनाकालः), जीवनाथस्य भावकुतूहलम् (वि.सं. १९१५ मितवर्षे रचनाकालः) ।

कतिपये सङ्ग्रहग्रन्थाश्च प्रणीताः सन्ति जातकशास्त्रस्य विकासक्रमे । ते च बलभद्रस्य होरारत्नम् (वि.सं. १६५२ मितवर्षे अस्यरचनाकालः), गोविन्दस्य होराकौस्तुभः (वि.सं. १७३५ मितवर्षे अस्य ग्रन्थसङ्ग्रहकालः), नारायणस्य होरासारसुधानिधिः (वि. सं.१७३५ अस्य ग्रन्थसंग्रहकालः), अन्ये कतिपये संग्रहग्रन्थाश्च विराजन्ते जातकशास्त्रे । एते हि कतिपय एव जातकग्रन्थाः समासतोऽत्र निर्दिष्टाः। एतेन जातकशास्त्रस्य विकासस्य संक्षिप्तं दिग्दर्शनं भवतीति।

**प्रश्नशास्त्रस्य विकासः**

होराशास्त्रस्य विकासक्रमे जातकशास्त्रादनन्तरं प्रश्नशास्त्रं विकसितं विद्यते । मिहिरपुत्रस्य पृथुयशसः(अनुमानितः स्थितिकालः वि.सं. ६२८) षट्पञ्चाशिका प्रश्नशास्त्रस्य प्रथमो लौकिक आधुनिकग्रन्थो वर्तते । तदनन्तरं भट्टोत्पलस्य प्रश्नज्ञानं केरलीय केरलप्रश्नतत्त्वसंग्रहः परमानन्दपाठकस्य प्रश्नमाणिक्यमाला च प्रश्नशास्त्रसम्बद्धाः प्रमुखग्रन्था विद्यन्ते ।

नैपालकफलवेदिना पद्मप्रभसूरिणा विरचितो भुवनदीपकः (वि.सं १२९४) १७० श्लोकात्मको लघुकाय उत्कृष्ट प्रश्नग्रन्थो नैपालकज्योतिषशास्त्रस्येतिहासे प्रसिद्धो विद्यते । एवञ्चाचार्यो दुर्गदेवविरचिते रिष्टसमुच्चयः (ने.सं १०८९) इत्याख्ये प्रश्नग्रन्थे अङ्गुलीप्रश्न, गोरोचनप्रश्न, प्रश्नाक्षरप्रश्न, होराप्रश्न, शकुनप्रश्न, अक्षरप्रश्न, लग्नप्रश्नश्चेति प्रकरणानि प्रतिपादतानि विद्यन्तेति नेमीचन्द्रशास्त्री कथयति ।

**ताजिकशास्त्रस्य विकासः**

होराशास्त्रस्य विकासक्रमे यवनज्योतिषेण प्रभावितं ताजिकशास्त्रं च समागच्छति । होराशास्त्रस्यापरभागः ताजिकशास्त्रमिति मन्यते । यवनाचार्येण पारसिकभाषायां प्रणीतस्य ताजिकग्रन्थस्य प्रभावेण शास्त्रस्यास्य

विकासो वर्द्धितः । दैवज्ञनीलकण्ठस्य ताजिकनीलकण्ठी यवनप्रभावाद्रचितो बहुप्रचारितो लब्धप्रतिष्ठितः प्रसिद्धग्रन्थो वर्तते । ताजिकभूषणः ताजिकतन्त्रसारादयः ग्रन्थाः ताजिकशास्त्रे लभ्यन्ते ।

**सामुद्रिकशास्त्रस्य विकासः**

होराशास्त्रस्यविकासक्रमे विकसितं सामुद्रिकशास्त्रमङ्गलक्षणशास्त्रं वा होराया अपरभागं वर्तते । पुरा समुद्रर्षिणा प्रोक्तं प्राचीनं नृस्त्रीलक्षणशास्त्रमेव सामुद्रिकशास्त्रं यत्र जातकस्य अङ्गलक्षणवशात् शुभाशुभफलं प्रकाश्यते । जगद्देवस्य सामुद्रिकशास्त्रं, मेधाविजयगणिनो हस्तसञ्जीवनं (वि.सं.१७३७) चास्य शास्त्रस्याधुनिकी कृतिर्वर्तते ।

**रमलशास्त्रस्य विकासः**

होराशास्त्रस्य विकासक्रमे रमलशास्त्रमपि पाशकविद्या (पासा वा जुवाखेल इति लोकभाषायां) रूपेण विकसितं विद्यते । होराशास्त्रविकासस्य प्राक्काले एव समुदितमिदं शास्त्रं रमलशब्देन यवनप्रभावाद्विकसितं द्योत्यते । चिन्तामणिदैवज्ञविरचिता रमलचिन्तामणिः(वि.सं. १७३५पूर्वमेव रचितम्), जयरामाख्येन विदुषा रमलामृतम् (वि.सं. १८०२), परमुखोपाध्यायप्रणतं रमलनवरत्नं (वि.सं.१८५७) सर्वत्र लब्धप्रसारिताः ग्रन्थाः ।

**स्वप्नशास्त्रस्य विकासः**

स्वप्नमादाय फलादेशकं हि स्वप्नशास्त्रम् । स्वप्नशास्त्रञ्च शास्त्रान्तराङ्गत्वेन बहुधा विकसितं न दृश्यते । नेपालीभाषायां विरचिते कविशिखरनाथकृते शिखरनाथाख्ये ग्रन्थे स्वप्नविचारप्रकरणे स्वप्नफलवर्णनं विद्यते। तथैव रामायणमहाभारतादिषु पुराणेषु च स्वप्नफलस्य वर्णनं विद्यते । धर्मसिन्धौ च स्वप्नविचारप्रकरणं विद्यते। तदाधारे स्वप्नो द्विविधः - इष्टफलदोऽनिष्टफलदश्चेति ।

**होराशास्त्रस्याधुनिकोत्तरवर्तनशीलः टीकाव्याख्याविस्तारकालः**

होराशास्त्रस्यार्वचीनोत्तरवर्तिनि विकासक्रमे टीकाग्रन्थप्रणीतत्वेन व्याख्याविस्तारकालो विकसितो विद्यते । बृहज्जातकस्य भट्टोत्पल्लीव्याख्यानेन होराशास्त्रे व्याख्याकालो विकसितः । पश्चाद्वर्तिकाले लोकभाषायामनेकाः टीकाव्याख्याश्च प्रणीताः सन्ति । सम्प्रति नूतनान्तर्ज्ञालप्रविधिमाध्यमेन पिडिएफ (PDF) नामाख्या होराशास्त्रसम्बद्धा ग्रन्थाः सञ्जालमाध्यमेनाविश्वे प्रचारिता विद्यन्ते । ते च सर्वत्रोपलभ्यन्ते । इदानीं नूतनग्रन्थप्रणयनं तु शैथिल्यमेव दृश्यते । विश्वविद्यालयान्तर्गतेषु ज्योतिषविभागेषु होराशास्त्रसम्बद्धविषयानां अनुसन्धानकार्याणि सञ्चाल्यमानानि सन्ति । लोके होराशास्त्रस्य विश्वासो वर्धमानो वर्तते । फलवेदिभिरस्य व्यावहारिकः प्रयोगश्च विहितो वर्तते ।

## नेपालदेशे फलितज्योतिषशास्त्रस्य संक्षिप्तविकासक्रमः

नेपालस्य सन्दर्भे फलितज्योतिषे संहिताहोराशास्त्रयोर्व्यावहारिकः प्रयोगः कदा प्रारब्धो जात इति स्पष्टतिथिस्त्वन्वेषणीयो वर्तते । बृहत्संहितायामुल्लिखितस्य इन्द्रध्वजोत्थानस्य प्राचीना परम्परा अद्यापि नेपाले काष्ठमण्डपनगरे इन्द्रजात्राख्येन नाम्ना राष्ट्रियोत्सवेन प्रचलितेनात्र प्रचीनकालादेव संहिताशास्त्रस्य व्यावहारिकप्रयोग आसीदिति ज्ञायते ।

सुमतितन्त्रे दत्तानां मानदेवादिसंवत्सराणामाधारे प्राचीनकालादेव लिच्छविसंवत्सरस्य प्रचलनात् नेपाले लिच्छविकालादेव त्रिस्कन्धज्योतिषशास्त्रस्य विकासस्य समृद्धपरम्परा आसीदिति ज्ञायते । विषयेऽस्मिन् " सिद्धान्तज्योतिषे नयराजपन्तस्य योगदानम्" इत्यनुसन्धानग्रन्थे अन्वेषकः श्यामखनालमहोदयः सूचयति। तत्रासौ नेपाले सिद्धान्तज्योतिषस्य विकासस्य संक्षिप्तेतिहासः प्रदर्शयति ।

श्रीपतिसदृशः त्रिस्कन्धज्ञो नेपालस्य कपिलवस्तुमण्डले अजायत इति नयराजपन्तस्यान्वेषणेन प्राप्तानि प्रमाणानि पुष्यन्ति । फलितज्योतिषस्य ग्रन्थपरम्परायां श्रीपतिजातकपद्धतिः (वि.सं.१०९६ रचनाकालः) सम्प्रति प्राप्यते इति आचार्यलोकमणिदाहाल उल्लिखति । परं तस्योत्तरवर्तिसमयस्य विकसिता शिष्यपरम्परा अद्य न प्राप्ता ।

श्रीमच्छतानन्देन विरचितायाः भास्वत्याः (रचनाकालः वि.सं. ११५६मितवर्षे), पञ्चाङ्गगणानार्थं नेपालीभाषायामनूदितेन तथा च नैपालकफलवेदीभिः नेपालीजातकानां जन्मपत्रिकायां भास्वत्यहर्गणानुसारेण पञ्चाङ्गोल्लेखनात् नेपाले सिद्धान्तहोरयोर्विकासः सहैव जात इत्यनुमीयते।

नैपालकफलवेदिना पद्मप्रभसूरिणा विरचितो भुवनदीपकः (वि.सं १२९४) १७० श्लोकात्मकः लघुकाय उत्कृष्ट प्रश्नग्रन्थो नैपालकज्योतिषशास्त्रस्येतिहासे प्रसिद्धो विद्यते । इतः परं श्रीदिवाकरात्मजेन श्रीविश्वनाथेन वि.सं. १८६१ मितवर्षे रचितस्य सूर्यसिद्धान्तस्य गूढार्थप्रकाशिका "सूर्यसिद्धान्तगणितोदाहरणम्" इत्यस्य राष्ट्रियाभिलेखालये प्राप्तेन पाण्डुलिपिना नेपालदेशस्य सन्दर्भे ज्योतिषशास्त्रस्य विकासक्रमस्य स्पष्टमार्गं परिदृश्यते ।

## निष्कर्षसारांशोपलब्धयः

प्रकृताध्ययनेन फलितज्योतिषशास्त्रस्यैतिह्यं किमस्तीति शोधजिज्ञासायां तस्य विकासक्रमश्चात्र स्पष्टतया समुद्घाटितः । वराहमिहिराचार्येण कृतस्य त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य विश्लेषणात् फलितज्योतिषशास्त्रस्य विकासस्यार्वाचीनस्य कालस्य नवक्षितिजस्योदयो जातः । तेन विश्लेषितं संहिताशास्त्रं होराशास्त्रं हि फलितज्योतिषस्य मूलं मुख्याधारञ्च । अमुष्योपजीव्यानां ग्रन्थकाराणां पूर्वाचार्याणां कालः

फलितज्योतिषस्य प्राचीनकालो मिहिरपश्चवर्तिकालस्त्वर्वाचीनकालः । प्राचीनसमये वैदिकसंहिताकालः, आर्षकालः, वेदाङ्गज्योतिषकालः, वराहमिहिरपूर्वकालः सन्धिकालो वा क्रमागतेन विकसिता विद्यन्ते । अर्वाचीनसमये फलितज्योतिषशास्त्रे संहिताहोराशास्त्रयोः शाखोपशाखानां विकास अभवत् । संहिताशास्त्रं ग्रहचार-कालफल-शकुन-स्वरभेदात् चतुष्पादयुतं मन्यते । तस्मात् वास्तु- मुहूर्त- स्वर-शकुनशास्त्रप्रभृतीनामनेकानां संहिताशास्त्रसम्बद्धानां भेदोपभेदानां विकास अभवत् । होराशास्त्रात् जातक-प्रश्न-ताजिक-सामुद्रिक-स्वप्न-रमलप्रभृतीनां शास्त्राणां विकासो जातः ।

वराहमिहिराचार्यात् फलितज्योतिषशास्त्रस्याधुनिककालस्य प्रथमो ग्रन्थप्रणयनचरणस्य प्रारम्भ अभूदिति सर्वैः ऐतिह्यविदाचार्यैः स्वीक्रियते । कालेऽस्मिन् संहिताविषयकं होराविषयकञ्च जातकं, प्रश्नः, ताजिकः, सामुद्रिकः, स्वरः, शकुनादिशास्त्राणां ग्रन्थप्रणयनं अभवत् । इतः परं फलितग्रन्थानां गूढार्थप्रकाशका अर्थगाम्भीर्ययुताः टीकालेखनारम्भो जातः । भट्टोत्पालः फलितग्रन्थानां भाष्यलेखनस्य कार्यमारब्धवान् । तस्य भट्टोत्पल्ली विवृत्तिः, प्राचीना टीकाश्च प्रामाणिका मन्यन्ते । तदनन्तरं बल्लालसेनस्य अद्भुतसागराख्यात् ग्रन्थात् फलितग्रन्थसङ्ग्रहस्य कार्यमारब्धम् । ततः प्राचीनभाष्यकाराः फलितग्रन्थानां सामान्यजनभाषायां व्याख्यां कर्तुं आरब्धवन्तः । सीतारामझा हिन्दीभाषायां अनेकेषां ज्योतिषग्रन्थानां अनुवादं व्याख्यानं च अकरोत्। अन्येषु टीकाकारेषु अनुवादकेषु च अच्युतानन्दझा, कपिलेश्वरशास्त्री, गणेशदत्तपाठकः, गंगाधरमिश्रः, लषणलालझा, केदारदत्तजोशी, रामजनममिश्रः, रामचन्द्रपाण्डेयप्रभृतीनां हिन्दीभाषायां अनूदिताः फलितज्योतिषग्रन्थाः विद्यन्ते । नेपालीभाषायां स्वल्पमात्रं फलितग्रन्था अनूदिताः सन्ति ।

प्रस्तुतशोधनिबन्धेन फलितज्योतिषशास्त्रस्य विकासक्रमस्य चरणाः स्पष्टतया वर्गीकृताः सन्ति । विकासक्रमस्य प्रतिचरणे ये ग्रन्था विरचितास्तेषां स्पष्टतिथय विक्रमाब्दे उल्लिखिताः सन्ति । ग्रन्थकारस्य स्थितिकालः, ग्रन्थस्य रचनाकालश्च विक्रमवत्सरे उल्लिखितो वर्तते । फलितज्योतिषस्य शाखाप्रशाखानां स्पष्टविभाजनेन तेषां विकासक्रमो निरूपितः । अनेनाध्ययनेन आचार्यकक्षास्तरीयछात्राः फलितजिज्ञासुपाठकाश्च लाभान्विता भविष्यन्तीति सुदृढविश्वासो वर्तते। एतदेवास्य शोधकार्यस्य उपलब्धिश्चास्ति । अस्य शोधलेखस्य पठनेन पाठकवर्याः फलितज्योतिषस्यैतिह्यं जानन्ति । इदमेवास्य शोधलेखस्यावदानमस्ति । नेपालदेशे अनेके ज्योतिषग्रन्था नेपालीभाषायामनूदिताः सन्ति । अतो नेपालीभाषायां ज्योतिषग्रन्थानुवादपरम्परा इति शीर्षके पुनः शोधकार्यं कर्तुं शक्यते ।

**सन्दर्भसामग्रीविवरणम्**

अज्ञात (ई.२०१५), *सूर्यसिद्धान्तः,* श्रीसूर्य–मयासुरसंवादरूपः (सम्पादकः सत्येन्द्रमिश्रः, संस्कृतव्याख्याकारः कपिलेश्वरशास्त्री, पुनर्मुद्रितम्) चौखम्बा संस्कृतभवनम् ।

काशीनाथोपाध्यायः (२०७७), *धर्मसिन्धुसारः* (सुबोधिनी नेपाली टीकाकारः हेमराजशर्मा पौडेलः, द्वितीय संस्करणम्, विद्यार्थी पुस्तक भण्डार ।

खिलनाथवास्ताकोटी (२०६१), *फलित ज्योतिषशास्त्र,* संस्कृतमा के छ ? जयतु संस्कृतम् ।

दयारामश्रेष्ठ एवम् मोहनराजशर्मा (२०६४), *नेपाली साहित्यको संक्षिप्त इतिहास* (नवमं संस्करणम्), साझा प्रकाशनम् ।

नारदऋषिः (ई.२०१२), *नारसंहिता,* चौखम्बा सुरभारती प्रकाशन ।

नेमिचन्द्रशास्त्री (ई.२०१२), *भारतीयज्योतिष,* (उनपञ्चाशतसंस्करणम्), भारतीय ज्ञानपीठ ।

पराशरः (२०६०), *बृहत्पाराशरहोराशास्त्रम्* (हिन्दीटीकाकारः पद्मनाभ शर्मा ),चौखम्बा सुरभारती प्रकाशन (पुनर्मुद्रित संस्करण ई.२०२१) ।

लगध (ई.२०१४), *वेदाङ्गज्योतिषम्* (व्याख्या - शिवराज आचार्यः कौडिन्यायनः), चौखम्बा विद्याभवन ।

लोकमणिदाहालः (ई.२०१४), *भारतीयज्योतिषशास्त्रस्येतिहासः* (द्वि.सं.) चौखम्बा सुरभारती प्रकाशन ।

... (२००७), *शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता,* बम्बई पुस्तकभण्डार ।

वराहमिहिरः (ई.२००३), *बृहत्संहिता* (व्याख्याकारः अच्युतानन्दझा ), पुनर्मुद्रित संस्करणम्, चौखम्बा विद्याभवन ।

.... (२०४२), *बृहज्जातकम्,* (भट्टोत्पलसंस्कृतव्याख्या, हिन्दीव्याख्याकारः केदारदत्तजोसी, पुनर्मुद्रित संस्करणम्), मोतिलाल वनारसीदास ।

शत्रुघ्नत्रिपाठी (२०६५), *ज्योतिर्निबन्धादर्शः,* चौखम्बा सुरभारती प्रकाशन।

श्यामखनालः (२०६९), *सिद्धान्तज्योतिषे नयराजपन्तस्य योगदानम्* , राजीवलोचनजोशी स्मारकप्रतिष्ठानम्।

सम्मोदआचार्यः *वेदाङ्गज्योतिषं तस्य वेदाङ्गत्वेन महत्त्वञ्च* (फेसबुकपेज, २ जनवरी, २०२५ ) ।